अभिमतः पित्रादीनां जनोजन्मस्थानम् । २ पित्रादिभिरध्युषिते स्थाने "अभिजनश्च" पा० "अभिजनो नाम यत्र पूर्व्वैरुषितम्" भाष्यम् । अभिमतोजनः श्रेष्ठत्वात् प्रा०स० । ४कुलश्रेष्ठे अभि+जन–भावे घञ् । उत्कृष्टस्थानजतया ५अभिमतोत्पत्तौ "श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति" मनुः ब्रह्ममुखोद्भवत्वेनाभिजनेन श्रेष्ठतया" कुल्लू० । अभिजायते सत्पुरुषोभवति येन करणे घञ् । ६कीर्त्तौ "यावत् कीर्त्तिर्हि लोकेषु तावत् पुरुष उच्यते" इत्युक्तेः कीर्त्त्यैव सफलजन्मत्वात्तस्यास्तथात्वम् । अभिजनादागतः अण् । आभिजनः वंशसंबन्धादागते, त्रि० "तां पार्व्वतीत्याभिजनेन नाम्ना" कु० ।

**अभिजात** त्रि० अभिमतं प्रशस्तं जातं जन्म यस्य । १कुलीने, "जात्यस्तेनाभिजातेन शूरः शौर्य्यवता कुशः" "भिन्नानस्त्रैर्मोहभाजोऽभिजातान्" च रघुः । २ पण्डिते, ३श्रेष्ठे "न म्लेच्छितव्यं यज्ञादौ स्त्रीषु नाप्राकृतं वदेत् । सङ्कीर्णं नाभिजातेषु नाप्रबुद्धेषु संस्कृतम्" वृद्धाः । ४मनोहरे । "प्रजल्पितायामभिजातवाचि" कु० । अभिजातस्य भावः ष्यञ् । आभिजात्यं कौलीन्ये न० । [जनने ।

**अभिजाति** स्त्री प्रशस्ता जातिः जननं प्रा०स० । प्रशस्तवंश-

**अभिजित्** त्रि० अभिमुखीभूय जयति शत्रून् अभि+जि–क्विप् । १अभिमुखीभूय शत्रुजयिनि । अभितो जयत्यनेन करणे क्विप् । २सर्वतोजयसाधने "अभिजिता तेजसा तेजोजिन्व" य० १५,७, "सर्व्वजयहेतुना तेजसा अन्नेन" वेददी० । "अभिजिदसि युक्तग्रावेन्द्राय" ता० ब्रा० "अभिजित् सर्वजयहेतुरसि" भा० । अभिजयति ऊर्द्ध्वाधःस्थित्या अपराणि नक्षत्राणि कर्त्तरि क्विप । "अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामवस्ताच्छ्रोणायाः" श्रुत्युक्ते ३नक्षत्रभेदे इतरनक्षत्राणां स्वकक्षामात्रस्थितेस्तस्य च ऊर्द्ध्वाधःस्थित्या इतरनक्षजयित्वात् तथात्वम् । अतएव भागवते "नक्षत्राणि मेरुं दक्षिणेनैव कालायने ईश्वरयोजितानि सहाभिजिताऽष्टाविंशति"रित्युक्तम् । नक्षत्रचक्रस्य अश्विन्यादिसप्तविंशतिनक्षत्रात्मकतया ज्योतिषे प्रसिद्धत्वेऽपि श्रुत्युक्तेराषाढोपरिश्रवणाधःस्थाने अभिजिन्नामकं नक्षत्रचक्रान्तर्गतमपि कर्म्मविशेषे फलविशेषार्थं ज्योतिषादौ स्वीकृतम् यथा" सप्त सप्त विलिखेत्तु रेखिकास्तिर्य्यगूर्द्ध्वमथ कृत्तिकादिकम् । लेखयेदभिजिता समन्वितं चैकरेखकगखगेन बिध्यते । वैश्वस्य चतुर्थांशे श्रवणादौ लिप्तिकाचतुष्के च । अभिजित् तत्स्थे खेटे विद्धा रोहिणी बिद्धा । ग्रहश्चेदेकरेखास्थो वेधः सप्तशलाकक" इति दीपिका ततश्च आषाढोपरिश्रवणाधोभागे तस्य स्थितावपि ऊनविंशकलात्मकत्व कर्म्मविशेषार्थं कल्पितम् तत्र ग्रहस्थित्या सप्तशलाकादिवेधवशात् विवाहादौ वर्ज्यता अनिष्टफलदायकत्वात् । श्रुतौ स्थानविशेषोक्तिस्तु तस्य स्थितिस्थानज्ञापनार्था अतएव सूर्य्यसिद्धान्ते "आप्यस्यैवाभिजित् प्रान्ते वैश्वान्ते श्रवणस्थितिरित्युक्तं व्याख्यातञ्चैतत् रङ्गनाथेन आप्यस्य पूर्व्वाषाढाया अवसाने, धनूराशौ विंशतिकलोनसप्तविंशतिभागे २६,४० अभिजिद्योगतारा" इति एवञ्च दीपिकोक्ता ऊनविंशतिकलात्मकता कर्मविशेषार्था अतएव अष्टाविंशतिनक्षत्राभिप्रायेणैव वृहत्संहितायामष्टाविसंशतिर्नक्षत्राधीश्वरा उक्ताः "अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः । योन्यर्य्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राश्च ॥ शक्रो निर्ऋतिस्तोयं विश्वे ब्रह्मा हरिर्वसुर्वरुणः । अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" ॥ तथा चाभिजितोब्रह्माधीश्वरः । अभिजयति इतरश्राद्धकालान् प्राशस्त्येन, आभिमुख्येन पश्चिमावस्थितां छायां जयति प्राग्वर्त्तिनीं करोति वा क्विप् । पश्चिमवर्त्तिच्छायायाः पूर्व्ववर्त्तित्वसम्पादके पञ्चदशधाविभक्तदिनस्याष्टमे कुतपाह्वये श्राद्धप्रशस्ते २ मुहूर्त्ते । "अपराह्णे तु संप्राप्ते अभिजिद्रोहिणोदये । यदत्र दीयते जन्तोस्तदक्षयमुदाहृतमिति" मत्०पु० उक्तेस्तस्येतरापेक्षयाऽक्षयफलदातृत्वात्तथात्वम् । "कुतपप्रथमभागे एकोद्दिष्टमुपक्रमेत् आवर्त्तनसमीपे वा" स्मृतेः "आरभ्य कुतपे श्राद्धं कुर्य्यादारोहिणं बुधः" इत्युक्तेश्च तन्मुहूर्त्तस्यारम्भकालतया प्रशस्तत्वाच्च तथात्वम् । अभिजयति शत्रून् गमनेनात्र आधारे" क्विप् । "मध्यं व्योमप्रयाते स्फुरदनलनिभे केशरे चार्कविम्बे छाया साध्वीव कान्ता प्रचलति पुरुषे यत्र तत्पादलग्ना । तावत् सौरेर्न दृष्टिः कुजकृतमशुभं नैव ऋक्षस्य योगः लक्ष्मीमारोग्यसम्पत्त्यर्च्चितमथ युवतीं तत्र गन्ता लभेत" इति ज्योतिषोक्ते ४ यात्रालग्नभेदे च । यद्यपि "सर्वस्मिन् विधुपापयुक्तनुलवावर्द्धे निशाङ्कोर्घटीत्र्यंशं वै" इत्यादिना दिनार्द्धपूर्व्वापरस्थघटीत्र्यंशात्मक–२० पलस्य सर्वत्र वर्ज्यता तथापि यात्रायां विशिष्याभिधानात्तदपवादः । "ततः प्रभाते विमले मुहूर्त्तेऽभिजिति प्रभुः" रामा० । अग्निष्टोमयागाङ्गे गवामयनिके ५ यागभेदे अभिजिदग्निष्टोम" इति कात्या० । अग्निष्टोमग्रहणादभि-